# shrIrAmasahasranAmAvaliH 2

# શ્રીરામસહસ્રનામાવલિઃ ૨

## Document Information

Text title : rAmasahasranAmAvaliH 2

File name : rAmasahasranAmAvaliH2.itx

Category : raama, sahasranAmAvalI, nAmAvalI

Location : doc_raama

Author : Pandit Divakar Anant Ghaisas

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# શ્રીરામસહસ્રનામાવલિઃ ૨

ૐ આર્યશ્રેષ્ઠાય નમઃ । ધરાપાલાય । સાકેતપુરપાલકાય ।
એકબાણાય । ધર્મવેત્ત્રે । સત્યસન્ધાય । અપરાજિતાય ।
ઇક્ષ્વાકુકુલસમ્ભૂતાય । રઘુનાથાય । સદાશ્રયાય । અઘધ્વંસિને ।
મહાપુણ્યાય । મનસ્વિને । મોહનાશનાય । અપ્રમેયાય । મહાભાગાય ।
સીતાસૌન્દર્યવર્ધનાય । અહલ્યોદ્ધારકાય । શાસ્ત્રે । કુલદીપાય નમઃ ॥ ૨૦

ૐ પ્રભાકરાય નમઃ । આપદ્વિનાશિને । ગુહ્યજ્ઞાય ।
સીતાવિરહવ્યાકુલાય । અન્તર્જ્ઞાનિને । મહાજ્ઞાનિને । શુદ્ધસંજ્ઞાય ।
અનુજપ્રિયાય । અસાધ્યસાધકાય । ભીમાય । મિતભાષિણે ।
વિદાંવરાય । અવતીર્ણાય । સમુત્તારાય । દશસ્યન્દનમાનદાય ।
આત્મારામાય । વિમાનાર્હાય । હર્ષામર્ષસુસઙ્ગતાય । અભિગમ્યાય ।
વિશાલાત્મને નમઃ ॥ ૪૦

ૐ વિરામાય નમઃ । ચિન્તનાત્મકાય । અદ્વિતીયાય ।
મહાયોગિને । સાધુચેતસે । પ્રસાદનાય । ઉગ્રશ્રિયે । અન્તકાય । તેજસે ।
તારણાય । ભૂરિસઙ્ગ્રહાય । એકદારાય । સત્ત્વનિધયે । સન્નિધયે ।
સ્મૃતિરૂપવતે । ઉત્તમાલઙ્કૃતાય । કર્ત્રે । ઉપમારહિતાય । કૃતિને ।
આજાનુબાહવે નમઃ ॥ ૬૦

ૐ અક્ષુબ્ધાય નમઃ । ક્ષુબ્ધસાગરદર્પઘ્ને ।
આદિત્યકુલસન્તાનાય । વંશોચિતપરાક્રમાય । સતામનુકૂલાય ।
ભાવબદ્ધકરૈઃ સદ્ભિઃ સ્તુતાય । ઉપદેષ્ટ્રે ।
નૃપોત્કૃષ્ટાય । ભૂજામાત્રે । ખગપ્રિયાય । ઓજોરાશયે ।
નિધયે । સાક્ષાત્ક્ષણદૃષ્ટાત્મચેતનાય । ઉમાપરીક્ષિતાય ।
મૂકાય । સન્ધિજ્ઞાય । રાવણાન્તકાય । અલૈકિકાય । લોકપાલાય ।
ત્રૈલોક્યવ્યાપ્તવૈભવાય નમઃ ॥ ૮૦

ૐ અનુજાશ્વાસિતાય નમઃ । શિષ્ટાય । ચાપધારિષુ વરિષ્ઠાય ।

ઉદ્યમિને । બુદ્ધિમતે । ગુપ્તાય । યુયુત્સવે । સર્વદર્શનાય । ઐક્ષ્વાકાય ।
લક્ષ્મણપ્રાણાય । લક્ષ્મીવતે । ભાર્ગવપ્રિયાય । ઇષ્ટદાય ।
સત્યદિદૃક્ષવે । દિગ્જયિને । દક્ષિણાયનાય । અનન્યવૃત્તયે । ઉદ્યોગિને ।
ચન્દ્રશેખરશાન્તિદાય । અનુજાર્થસમુત્કણ્ઠાય નમઃ ॥ ૧૦૦

ૐ સુરત્રાણાય નમઃ । સુરાકૃતયે । અશ્વમેધિને । યશોવૃદ્ધાય ।
તરુણાય । તારણેક્ષણાય । અપ્રાકૃતાય । પ્રતિજ્ઞાત્રે । વરપ્રાપ્તાય ।
વરપ્રદાય । અભૂતપૂર્વાય । અદ્ભુતધ્યેયાય । રુદ્રપ્રેમિણે । સુશીતલાય ।
અન્તઃસ્પૃશે । ધનુઃસ્પૃશે । ભરતાપૃષ્ટકૌશલાય । આત્મસંસ્થાય ।
મનઃસંસ્થાય । સત્ત્વસસ્થાય નમઃ ॥ ૧૨૦

ૐ રણસ્થિતાય નમઃ । ઈર્ષ્યાહીનાય । મહાશક્તયે ।
સૂર્યવંશિને । જનસ્તુતાય । આસનસ્થાય । બાન્ધવસ્થાય ।
શ્રદ્ધાસ્થાનાય । ગુણસ્થિતાય । ઇન્દ્રમિત્રાય । અશુભહરાય ।
માયાવિમૃગઘાતકાય । અમોઘેષવે । સ્વભાવજ્ઞાય ।
નામોચ્ચારણસંસ્મૃતાય । અરણ્યરુદનાક્રાન્તાય ।
બાષ્પસઙ્ગુલલોચનાય । અમોઘાશીર્વચસે । અમન્દાય ।
વિદ્વદ્વન્દ્યાય નમઃ ॥ ૧૪૦

ૐ વનેચરાય નમઃ । ઇન્દ્રાદિદેવતાતોષાય । સંયમિને ।
વ્રતધારકાય । અન્તર્યામિણે । વિનષ્ટારયે । દમ્ભહીનાય । રવિદ્યુતયે ।
કાકુત્સ્થાય । ગિરિગમ્ભીરાય । તાટકાપ્રાણકર્ષણાય ।
કન્દમૂલાન્નસન્તુષ્ટાય । દણ્ડકારણ્યશોધનાય । કર્તવ્યદક્ષાય ।
સ્નેહાર્દ્રાય । સ્નેહકૃતે । કામસુન્દરાય । કૈકયીલીનપ્રવૃત્તયે ।
નિવૃત્તયે । નામકીર્તિતાય નમઃ ॥ ૧૬૦

ૐ કબન્ધઘ્નાય નમઃ । ભયત્રાણાય । ભરદ્વાજકૃતાદરાય ।
કરુણાય । પુરુષશ્રેષ્ઠાય । પુરુષાય । પરમાર્થવિદે । કેવલાય ।
સુતસઙ્ગીતાકર્ષિતાય । ઋષિસઙ્ગતાય । કાવ્યાત્મને । નયવિદે ।
માન્યાય । મુક્તાત્મને । ગુરુવિક્રમાય । ક્રમજ્ઞાય । કર્મશાસ્ત્રજ્ઞાય ।
સમ્બન્ધજ્ઞાય । સુલક્ષણાય । કિષ્કિન્ધેશહિતાકાઙ્ક્ષિણે નમઃ ॥ ૧૮૦

ૐ લઘુવાક્યવિશારદાય નમઃ । કપિશ્રેષ્ઠસમાયુક્તાય ।
પ્રાચીનાય । વલ્કલાવૃતાય । કાકપ્રેરિતબ્રહ્માસ્ત્રાય ।
સપ્તતાલવિભઞ્જનાય । કપટજ્ઞાય । કપિપ્રીતાય ।

કવિસ્ફૂર્તિપ્રદાયકાય । કિંવદન્તીદ્વિધાવૃત્તયે । નિધારાદ્રયે ।
વિધિપ્રિયાય । કાલમિત્રાય । કાલકર્ત્રે । કાલદિગ્દર્શિતાન્તવિદે ।
ક્રાન્તદર્શિને । વિનિષ્ક્રાન્તાય । નીતિશાસ્ત્રપુરઃસરાય ।
કુણ્ડલાલઙ્કૃતશ્રોત્રાય । ભ્રાન્તિઘ્ને નમઃ ॥ ૨૦૦

ૐ ભ્રમનાશકાય નમઃ । કમલાયતાક્ષાય । નીરોગાય ।
સુબદ્ધાઙ્ગાય । મૃદુસ્વનાય । ક્રવ્યાદઘ્નાય । વદાન્યાત્મને ।
સંશયાપન્નમાનસાય । કૌસલ્યાક્રોડવિશ્રામાય । કાકપક્ષધરાય ।
શુભાય । ખલક્ષયાય । અખિલશ્રેષ્ઠાય । પૃથુખ્યાતિપુરસ્કૃતાય ।
ગુહકપ્રેમભાજે । દેવાય । માનવેશાય । મહીધરાય । ગૂઢાત્મને ।
જગદાધારાય નમઃ ॥ ૨૨૦

ૐ કલત્રવિરહાતુરાય નમઃ । ગૂઢાચારાય । નરવ્યાઘ્રાય ।
બુધાય । બુદ્ધિપ્રચોદનાય । ગુણભૃતે । ગુણસઙ્ઘાતાય ।
સમાજોન્નતિકારણાય । ગૃધ્રહૃદ્ગતસઙ્કલ્પાય । નલનીલાઙ્ગદપ્રિયાય ।
ગૃહસ્થાય વિપિનસ્થાયિને । માર્ગસ્થાય । મુનિસઙ્ગતાય । ગૂઢજત્રવે ।
વૃષસ્કન્ધાય । મહોદારાય । શમાસ્પદાય । ચારવૃત્તાન્તસન્દિષ્ટાય ।
દુરવસ્થાસહાય નમઃ ॥ ૨૪૦

ૐ સખ્યે નમઃ । ચતુર્દશસહસ્રઘ્નાય । નાનાસુરનિષુદનાય ।
ચૈત્રેયાય । ચિત્રચરિતાય । ચમત્કારક્ષમાય । અલઘવે । ચતુરાય ।
બાન્ધવાય । ભર્ત્રે । ગુરવે । આત્મપ્રબોધનાય । જાનકીકાન્તાય ।
આનન્દાય । વાત્સલ્યબહુલાય । પિત્રે । જટાયુસેવિતાય । સૌમ્યાય ।
મુક્તિધાસે । પરન્તપાય નમઃ ॥ ૨૬૦

ૐ જનસઙ્ગ્રહકૃતે નમઃ । સૂક્ષ્માય । ચરણાશ્રિતકોમલાય ।
જનકાનન્દસઙ્કલ્પાય । સીતાપરિણયોત્સુકાય । તપસ્વિને ।
દણ્ડનાધારાય । દેવાસુરવિલક્ષણાય । ત્રિબન્ધવે । વિજયાકાઙ્ક્ષિણે ।
પ્રતિજ્ઞાપારગાય । મહતે । ત્વરિતાય । દ્વેષહીનેચ્છાય । સ્વસ્થાય ।
સ્વાગતતત્પરાય । જનનીજનસૌજન્યાય । પરિવારાગ્રણ્યે । ગુરવે ।
તત્ત્વવિદે નમઃ ॥ ૨૮૦

ૐ તત્ત્વસન્દેષ્ટ્રે નમઃ । તત્ત્વાચારિણે । વિચારવતે ।
તીક્ષ્ણબાણાય । ચાપપાણયે । સીતાપાણિગ્રહિણે । યૂને ।
તીક્ષ્ણાશુગાય । સરિત્તીર્ણાય । લઙ્ઘિતોગ્રમહીધરાય । દેવતાસઙ્ગતાય ।

અસઙ્ગાય । રમણીયાય । દયામયાય । દિવ્યાય । દેદીપ્યમાનાભાય ।
દારુણારિનિષૂદનાય । દુર્ધર્ષાય । દક્ષિણાય । દક્ષાય નમઃ ॥ ૩૦૦

ૐ દીક્ષિતાય નમઃ । અમોઘવીર્યવતે । દાત્રે ।
દૂરગતાખ્યાતયે । નિયન્ત્રે । લોકસંશ્રયાય । દુષ્કીર્તિશઙ્કિતાય ।
વીરાય । નિષ્પાપાય । દિવ્યદર્શનાય । દેહધારિણે । બ્રહ્મવેત્ત્રે ।
વિજિગીષવે । ગુણાકરાય । દૈત્યઘાતિને । બાણપાણયે । બ્રહ્માસ્ત્રાઢ્યાય ।
ગુણાન્વિતાય । દિવ્યાભરણલિપ્તાઙ્ગાય । દિવ્યમાલ્યસુપૂજિતાય નમઃ ॥ ૩૨૦

ૐ દૈવજ્ઞાય નમઃ । દેવતાઽઽરાધ્યાય । દેવકાર્યસમુત્સુકાય ।
દૃઢપ્રતિજ્ઞાય । દીર્ઘાયુષે । દુષ્ટદણ્ડનપણ્ડિતાય ।
દણ્ડકારણ્યસઞ્ચારિણે ।
ચતુર્દિગ્વિજયિને । જયાય । દિવ્યજન્મને । ઇન્દ્રિયેશાય ।
સ્વલ્પસન્તુષ્ટમાનસાય । દેવસમ્પૂજિતાય । રમ્યાય । દીનદુર્બલરક્ષકાય ।
દશાસ્યહનનાય । અદૂરાય । સ્થાણુસદૃશનિશ્ચયાય ।
દોષઘ્ને । સેવકારામાય નમઃ ॥ ૩૪૦

ૐ સીતાસન્તાપનાશનાય નમઃ । દૂષણઘ્નાય । ખરધ્વંસિને ।
સમગ્રનૃપનાયકાય । દુર્ધરાય । દુર્લભાય । દીપ્તાય ।
દુર્દિનાહતવૈભવાય । દીનનાથાય । દિવ્યરથાય । સજ્જનાત્મમનોરથાય ।
દિલીપકુલસન્દીપાય । રઘુવંશસુશોભનાય । દીર્ઘબાહવે ।
દૂરદર્શિને । વિચારાય । વિધિપણ્ડિતાય । ધનુર્ધરાય । ધનિને ।
દાન્તાય નમઃ ॥ ૩૬૦

ૐ તાપસાય નમઃ । નિયતાત્મવતે । ધર્મસેતવે । ધર્મમાર્ગાય ।
સેતુબન્ધનસાધનાય । ધર્મોદ્ધારાય । મનોરૂપાય । મનોહારિણે ।
મહાધનાય । ધ્યાતૃધ્યેયાત્મકાય । મધ્યાય । મોહલોભપ્રતિક્રિયાય ।
ધામમુચે । પુરમુચે । વક્ત્રે । દેશત્યાગિને । મુનિવ્રતિને । ધ્યાનશક્તયે ।
ધ્યાનમૂર્તયે । ધ્યાતૃરૂપાય નમઃ ॥ ૩૮૦

ૐ વિધાયકાય નમઃ । ધર્માભિપ્રાયવિજ્ઞાનિને । દૃઢાય ।
દુઃ સ્વપ્નનાશનાય । ધરન્ધરાય । ધરાભર્ત્રે । પ્રશસ્તાય ।
પુણ્યબાન્ધવાય । નીલાભાય । નિશ્ચલાય । રાજ્ઞે । કૌસલ્યેયાય ।
રઘૂત્તમાય । નીલનીરજસઙ્કાશાય । કર્કશાય । વિષકર્ષણાય ।
નિરન્તરાય । સમારાધ્યાય । સેનાધ્યક્ષાય । સનાતનાય નમઃ ॥ ૪૦૦

ૐ નિશાચરભયાવર્તાય નમઃ । વર્તમાનાય । ત્રિકાલવિદે ।
નીતિજ્ઞાય । રાજનીતિજ્ઞાય । ધર્મનીતિજ્ઞાય । આત્મવતે । નાયકાય ।
સાયકોત્સારિણે । વિપક્ષાસુવિકર્ષણાય । નૌકાગામિને ।
કુશેશાયિને । તપોધામ્ને । આર્તરક્ષણાય ।(તપોધામાર્તરક્ષણાય)।
નિઃસ્પૃહાય । સ્પૃહણીયશ્રિયે । નિજાનન્દાય । વિતન્દ્રિતાય ।
નિત્યોપાયાય । વનોપેતાય નમઃ ॥ ૪૨૦

ૐ ગુહકાય નમઃ । શ્રેયસાન્નિધયે । નિષ્ઠાવતે । નિપુણાય ।
ધુર્યાય । ધૃતિમતે । ઉત્તમસ્વરાય । નાનાઋષિમખાહૂતાય ।
યજમાનાય । યશસ્કરાય । મૈથિલીદૂષિતાર્તાન્તઃકરણાય ।
વિબુધપ્રિયાય । નિત્યાનિત્યવિવેકિને । સત્કાર્યસજ્જાય । સદુક્તિમતે ।
પુરુષાર્થદર્શકાય । વાગ્મિને । હનુમત્સેવિતાય । પ્રભવે ।
પ્રૌઢપ્રભાવાય નમઃ ॥ ૪૪૦

ૐ ભાવજ્ઞાય નમઃ । ભક્તાધીનાય । ઋષિપ્રિયાય । પાવનાય ।
રાજકાર્યજ્ઞાય । વસિષ્ઠાનન્દકારણાય । પર્ણગેહિને । વિગૂઢાત્મને ।
કૂટજ્ઞાય । કમલેક્ષણાય । પ્રિયાર્હાય । પ્રિયસઙ્કલ્પાય । પ્રિયામોદન-
પણ્ડિતાય । પરદુઃખાર્તચેતસે । દુર્વ્યસનેઽચલનિશ્ચયાય ।
પ્રમાણાય । પ્રેમસંવેદ્યાય । મુનિમાનસચિન્તનાય । પ્રીતિમતે ।
ઋતવતે નમઃ ॥ ૪૬૦

ૐ વિદુષે નમઃ । કીર્તિમતે । યુગધારણાય । પ્રેરકાય ।
ચન્દ્રવચ્ચારવે । જાગૃતાય । સજ્જકાર્મુકાય । પૂજ્યાય । પવિત્રાય ।
સર્વાત્મને । પૂજનીયાય । પ્રિયંવદાય । પ્રાપ્યાય । પ્રાપ્તાય । અનવદ્યાય ।
સ્વર્નિલયાય । નીલવિગ્રહિણે । પરતત્ત્વાર્થસન્મૂર્તયે । સત્કૃતાય ।
કૃતવિદે નમઃ ॥ ૪૮૦

ૐ વરાય નમઃ । પ્રસન્નાય । પ્રયતાય । પ્રીતાય । પ્રિયપ્રાયાય ।
પ્રતીક્ષિતાય । પાપઘ્ને । શક્રદત્તાસ્ત્રાય । શક્રદત્તરથસ્થિતાય ।
પ્રાતર્ધ્યેયાય । સદાભદ્રાય । ભયભઞ્જનકોવિદાય । પુણ્યસ્મરણાય ।
સન્નદ્ધાય । પુણ્યપુષ્ટિપરાયણાય । પુત્રયુગ્મપરિસ્પૃષ્ટાય । વિશ્વાસાય ।
શાન્તિવર્ધનાય । પરિચર્યાપરામર્શિને । ભૂમિજાપતયે નમઃ ॥ ૫૦૦

ૐ ઈશ્વરાય નમઃ । પાદુકાદાય । અનુજપ્રેમિણે । ઋજુનામ્ને ।
અભયપ્રદાય । પુત્રધર્મવિશેષજ્ઞાય । સમર્થાય । સઙ્ગરપ્રિયાય ।

પુષ્પવર્ષાવશુભ્રાઙ્ગાય । જયવતે । અમરસ્તુતાય । પુણ્યશ્લોકાય ।
પ્રશાન્તાર્ચિષે । ચન્દનાઙ્ગવિલેપનાય । પૌરાનુરઞ્જનાય । શુદ્ધાય ।
સુગ્રીવકૃતસઙ્ગતયે । પાર્થિવાય । સ્વાર્થસન્ન્યાસિને ।
સુવૃત્તાય નમઃ ॥ ૫૨૦

ૐ પરચિત્તવિદે નમઃ । પુષ્પકારૂઢવૈદેહીસંલાપસ્નેહવર્ધનાય ।
પિતૃમોદકરાય । અરૂક્ષાય । નષ્ટરાક્ષસવલ્ગનાય । પ્રાવૃણ્મેઘ-
સમોદારાય । શિશિરાય । શત્રુકાલનાય । પૌરાનુગમનાય ।
અવધ્યાય । વૈરિવિધ્વંસનવ્રતિને । પિનાકિમાનસાહ્લાદાય ।
વાલુકાલિઙ્ગપૂજકાય । પુરસ્થાય । વિજનસ્થાયિને । હૃદયસ્થાય ।
ગિરિસ્થિતાય । પુણ્યસ્પર્શાય । સુખસ્પર્શાય ।
પદસંસૃષ્ટપ્રસ્તરાય નમઃ ॥ ૫૪૦

ૐ પ્રતિપન્નસમગ્રશ્રિયે નમઃ । સત્પ્રપન્નાય । પ્રતાપવતે ।
પ્રણિપાતપ્રસન્નાત્મને । ચન્દનાદ્ભુતશીતલાય । પુણ્યનામસ્મૃતાય ।
નિત્યાય । મનુજાય । દિવ્યતાં ગતાય । બન્ધચ્છેદિને । વનચ્છન્દાય ।
સ્વચ્છન્દાય । છાદનાય । ધ્રુવાય । બન્ધુત્રયસમાયુક્તાય । હૃન્નિ-
ધાનાય । મનોમયાય । વિભીષણશરણ્યાય । શ્રીયુક્તાય ।
શ્રીવર્ધનાય નમઃ ॥ ૫૬૦

ૐ પરાય નમઃ । બન્ધુનિક્ષિપ્તરાજ્યસ્વાય । સીતામોચનધોરણ્યે ।
ભવ્યભાલાય । સમુન્નાસાય । કિરીતાઙ્કિતમસ્તકાય ।
ભવાબ્ધિતરણાય । બોધાય । ધનમાનવિલક્ષણાય । ભૂરિભૃતે ।
ભવ્યસઙ્કલ્પાય । ભૂતેશાત્મને । વિબોધનાય । ભક્તચાતકમેઘાર્દ્રાય ।
મેધાવિને । વર્ધિતશ્રુતયે । ભયનિષ્કાસનાય । અજેયાય ।
નિર્જરાશાપ્રપૂરકાય । ભવસારાય નમઃ ॥ ૫૮૦

ૐ ભાવસારાય નમઃ । ભક્તસર્વસ્વરક્ષકાય । ભાર્ગવૌજસે ।
સમુત્કર્ષાય । રાવણસ્વસૃમોહનાય । ભરતન્યસ્તરાજ્યશ્રિયે ।
જાનકીસુખસાગરાય । મિથિલેશ્વરજામાત્રે । જાનકીહૃદયેશ્વરાય ।
માતૃભક્તાય । અનન્તશ્રિયે । પિતૃસન્દિષ્ટકર્મકૃતે । મર્યાદાપુરુષાય ।
શાન્તાય । શ્યામાય । નીરજલોચનાય । મેઘવર્ણાય । વિશાલાક્ષાય ।
શરવર્ષાવભીષણાય । મન્ત્રવિદે નમઃ ॥ ૬૦૦

ૐ ગાધિજાદિષ્ટાય નમઃ । ગૌતમાશ્રમપાવનાય । મધુરાય ।

અમન્દગાય । સત્ત્વાય । સાત્ત્વિકાય । મૂદુલાય । બલિને ।
મન્દસ્મિતમુખાય । અલુબ્ધાય । વિશ્રામાય । સુમનોહરાય ।
માનવેન્દ્રાય । સભાસજ્જાય । ઘનગમ્ભીરગર્જનાય । મૈથિલીમોહનાય ।
માનિને । ગર્વઘ્નાય । પુણ્યપોષણાય । મધુજાય નમઃ ॥ ૬૨૦

ઓમધુરાકારાય નમઃ । મધુવાચે । મધુરાનનાય । મહાકર્મણે ।
વિરાધઘ્નાય । વિઘ્નશાન્તયે । અરિન્દમાય । મર્મસ્પર્શિર્શને ।
નવોન્મેષાય । ક્ષત્રિયાય । પુરુષોત્તમાય । મારીચવઞ્ચિતાય ।
ભાર્યાપ્રિયકૃતે । પ્રણયોત્કટાય । મહાત્યાગિને । રથારૂઢાય ।
પદગામિને । બહુશ્રુતાય । મહાવેગાય । મહાવીર્યાય નમઃ ॥ ૬૪૦

ૐ વીરાય નમઃ । માતલિસારથયે । મખત્રાત્રે । સદાચારિણે ।
હરકાર્મુકભઞ્જનાય । મહાપ્રયાસાય । પ્રામાણ્યગ્રાહિણે । સર્વસ્વદાયકાય ।
મુનિવિઘ્નાન્તકાય । શસ્ત્રિણે । શાપસમ્ભ્રાન્તલોચનાય ।
મલહારિણે । કલાવિજ્ઞાય । મનોજ્ઞાય । પરમાર્થવિદે । મિતાહારિણે ।
સહિષ્ણવે । ભૂપાલકાય । પરવીરઘ્ને । માતૃસ્નેહિને નમઃ ॥ ૬૬૦

ૐ સુતસ્નેહિને નમઃ । સ્નિગ્ધાઙ્ગાય । સ્નિગ્ધદર્શનાય ।
માતૃપિતૃપદસ્પર્શિને । અશ્મસ્પર્શિને । મનોગતાય । મૃદુસ્પર્શાય ।
ઇષુસ્પર્શિને । સીતાસમ્મિતવિગ્રહાય । માતૃપ્રમોદનાય । જપ્યાય ।
વનપ્રસ્થાય । પ્રગલ્ભધિયે । યજ્ઞસંરક્ષણાય । સાક્ષિણે । આધારાય ।
વેદવિદે । નૃપાય । યોજનાચતુરાય । સ્વામિને નમઃ ॥ ૬૮૦

ૐ દીર્ઘાન્વેષિણે નમઃ । સુબાહુઘ્ને । યુગેન્દ્રાય । ભારતાદર્શાય ।
સૂક્ષ્મદર્શિને । ઋજુસ્વનાય । યદૃચ્છાલાભલબ્ધાશિને ।
મન્ત્રરશ્મિપ્રભાકરાય । યજ્ઞાહૂતનૃપવૃન્દાય । ઋક્ષવાનરસેવિતાય ।
યજ્ઞદત્તાય । યજ્ઞકર્ત્રે । યજ્ઞવેત્ત્રે । યશોમયાય । યતેન્દ્રિયાય ।
યતિને । યુક્તાય । રાજયોગિને । હરપ્રિયાય । રાઘવાય નમઃ ॥ ૭૦૦

ૐ રવિવંશાઢયાય નમઃ । રામચન્દ્રાય । અરિમર્દનાય । રુચિરાય ।
ચિરસન્ધેયાય । સઙ્ઘર્ષજ્ઞાય । નરેશ્વરાય । રુચિરસ્મિતશોભાઢ્યાય ।
દૃઢોરસ્કાય । મહાભુજાય । રાજ્યહીનાય । પુરત્યાગિને ।
બાષ્પસઙ્કુલલોચનાય । ઋષિસમ્માનિતાય । સીમાપારીણાય ।
રાજસત્તમાય । રામાય । દાશરથયે । શ્રેયસે ।
ભુવિ પરમાત્મસમાય નમઃ ॥ ૭૨૦

ૐ લઙ્કેશક્ષોભણાય નમઃ । ધન્યાય । ચેતોહારિણે । સ્વયન્ધનાય ।
લાવણ્યખનયે । આખ્યાતાય । પ્રમુખાય । ક્ષત્રરક્ષણાય ।
લઙ્કાપતિભયોદ્રેકાય । સુપુત્રાય । વિમલાન્તરાય ।
વિવેકિને । કોમલાય । કાન્તાય । ક્ષમાવતે । દુરિતાન્તકાય ।
વનવાસિને । સુખત્યાગિને । સુખકૃતે । સુન્દરાય નમઃ ॥ ૭૪૦

ૐ વશિને નમઃ । વિરાગિણે । ગૌરવાય । ધીરાય । શૂરાય ।
રાક્ષસઘાતકાય । વર્ધિષ્ણવે । વિજયિને । પ્રાજ્ઞાય । રહસ્યજ્ઞાય ।
વિમર્શવિદે । વાલ્મીકિપ્રતિભાસ્રોતસે । સાધુકર્મણે । સતાં ગતયે ।
વિનયિને । ન્યાયવિજ્ઞાત્રે । પ્રજારઞ્જનધર્મવિદે । વિમલાય । મતિમતે ।
નેત્રે નમઃ ॥ ૭૬૦

ૐ નેત્રાનન્દપ્રદાયકાય નમઃ । વિનીતાય । વૃદ્ધસૌજન્યાય ।
વૃક્ષભિદે । ચેતસા ઋજવે । વત્સલાય । મિત્રહૃન્મોદાય ।
સુગ્રીવહિતકૃતે । વિભવે । વાલિનિર્દલનાય । અસહ્યાય । ઋક્ષસાહ્યાય ।
મહામતયે । વૃક્ષાલિઙ્ગનલીલાવિદે । મુનિમોક્ષપટવે । સુધિયે ।
વરેણ્યાય । પરમોદારાય । નિગ્રહિણે । ચિરવિગ્રહિણે નમઃ ॥ ૭૮૦

ૐ વાસવોપમસામર્થ્યાય । જ્યાસઙ્ઘાતોગ્રનિઃસ્વનાય ।
વિશ્વામિત્રપરામૃષ્ટાય । પૂર્ણાય । બલસમાયુતાય । વૈદેહીપ્રાણસન્તોષાય ।
શરણાગતવત્સલાય । વિનમ્રાય । સ્વાભિમાનાર્હાય ।
પર્ણશાલાસમાશ્રિતાય । વૃત્તગણ્ડાય । શુભદન્તિને । સમભ્રૂદ્વય-
શોભિતાય । વિકસત્પઙ્કજાભાસ્યાય । પ્રેમદૃષ્ટયે । સુલોચનાય ।
વૈષ્ણવાય । નરશાર્દૂલાય । ભગવતે । ભક્તરક્ષણાય નમઃ ॥ ૮૦૦

ૐ વસિષ્ઠપ્રિયશિષ્યાય નમઃ । ચિત્સ્વરૂપાય ।
ચેતનાત્મકાય । વિવિધાપત્પરાક્રાન્તાય । વાનરોત્કર્ષકારણાય ।
વીતરાગિણે । શર્મદાયિને । મુનિમન્તવ્યસાધનાય । વિરહિણે ।
હરસઙ્કલ્પાય । હર્ષોત્ફુલ્લવરાનનાય । વૃત્તિજ્ઞાય । વ્યવહારજ્ઞાય ।
ક્ષેમકારિણે । પૃથુપ્રભાય । વિપ્રપ્રેમિણે । વનક્રાન્તાય । ફલભુજે ।
ફલદાયકાય । વિપન્મિત્રાય નમઃ ॥ ૮૨૦

ૐ મહામન્ત્રાય નમઃ । શક્તિયુક્તાય । જટાધરાય ।
વ્યાયામવ્યાયતાકારાય । વિદાં વિશ્રામસમ્ભવાય । વન્યમાનવ-
કલ્યાણાય । કુલાચારવિચક્ષણાય । વિપક્ષોરઃપ્રહારજ્ઞાય ।

ચાપધારિબહૂકૃતાય । વિપલ્લઙ્ઘિને । ઘનશ્યામાય ।
ઘોરકૃદ્રાક્ષસાસહાય । વામાઙ્કાશ્રયિણીસીતામુખદર્શનતત્પરાય ।
વિવિધાશ્રમસમ્પૂજ્યાય । શરભઙ્ગકૃતાદરાય । વિષ્ણુચાપધરાય ।
ક્ષત્રાય । ધનુર્ધરશિરોમણયે । વનગામિને । પદત્યાગિને નમઃ ॥ ૮૪૦

ૐ પાદચારિણે નમઃ । વ્રતસ્થિતાય । વિજિતાશાય ।
મહાવીરાય । દાક્ષિણ્યનવનિર્ઝરાય । વિષ્ણુતેજોંઽશસમ્ભૂતાય ।
સત્યપ્રેમિણે । દૃઢવ્રતાય । વાનરારામદાય । નમ્રાય । મૃદુભાષિણે ।
મહામનસે । શત્રુઘ્ને । વિઘ્નહન્ત્રે । સલ્લોકસમ્માનતત્પરાય ।
શત્રુઘ્નાગ્રજનયે । શ્રીમતે । સાગરાદરપૂજકાય । શોકકર્ત્રે ।
શોકહર્ત્રે નમઃ ॥ ૮૬૦

ૐ શીલવતે નમઃ । હૃદયઙ્ગમાય । શુભકૃતે । શુભસઙ્કલ્પાય ।
કૃતાન્તાય । દૃઢસઙ્ગરાય । શોકહન્ત્રે । વિશેષાર્હાય ।
શેષસઙ્ગતજીવનાય । શત્રુજિતે । સર્વકલ્યાણાય । મોહજિતે ।
સર્વમઙ્ગલાય । શમ્બૂકવધવકાય । અભીષ્ટદાય । યુગધર્માગ્રહિણે ।
યમાય । શક્તિમતે રણમેધાવિને । શ્રેષ્ઠાય નમઃ ॥ ૮૮૦

ૐ સામર્થ્યસંયુતાય નમઃ । શિવસ્વાય । શિવચૈતન્યાય । શિવાત્મને ।
શિવબોધનાય । શબરીભાવનામુગ્ધાય । સર્વમાર્દવસુન્દરાય ।
શમિને । દમિને । સમાસીનાય । કર્મયોગિને । સુસાધકાય ।
શાકભુજે । ક્ષેપણાસ્ત્રજ્ઞાય । ન્યાયરૂપાય । નૃણાં વરાય ।
શૂન્યાશ્રમાય । શૂન્યમનસે । લતાપાદપપૃચ્છકાય ।
શાપોક્તિરહિતોદ્ધારાય નમઃ ॥ ૯૦૦

ૐ નિર્મલાય નમઃ । નામપાવનાય । શુદ્ધાન્તઃકરણાય ।
પ્રેષ્ઠાય । નિષ્કલઙ્કાય । અવિકમ્પનાય । શ્રેયસ્કરાય । પૃથુસ્કન્ધાયા
બન્ધનાસયે । સુરાર્ચિતાય । શ્રદ્ધેયાય । શીલસમ્પન્નાય । સુજનાય ।
સજ્જનાન્તિકાય । શ્રમિકાય । શ્રાન્તવૈદેહીવિશ્રામાય । શ્રુતિપારગાય ।
શ્રદ્ધાલવે । નીતિસિદ્ધાન્તિને । સભ્યાય નમઃ ॥ ૯૨૦

ૐ સામાન્યવત્સલાય નમઃ । સુમિત્રાસુતસેવાર્થિને ।
ભરતાદિષ્ટવૈભવાય । સાધ્યાય । સ્વાધ્યાયવિજ્ઞેયાય । શબ્દપાલાય ।
પરાત્પરાય । સઞ્જીવનાય । જીવસખ્યે । ધનુર્વિદ્યાવિશારદાય ।
યમબુદ્ધયે । મહાતેજસે । અનાસક્તાય । પ્રિયાવહાય । સિદ્ધાય ।

સર્વાઙ્ગસમ્પૂર્ણાય । કારુણ્યાર્દ્રપયોનિધયે । સુશીલાય । શિવચિત્ત-
જ્ઞાય । શિવધ્યેયાય નમઃ ॥ ૯૪૦

ૐ શિવાસ્પદાય નમઃ । સમદર્શિને । ધનુર્ભઙ્ગિને ।
સંશયોચ્છેદનાય । શુચયે । સત્યવાદિને । કાર્યવાહાય । ચૈતન્યાય ।
સુસમાહિતાય । સન્મિત્રાય । વાયુપુત્રેશાય । વિભીષણકૃતાનતયે ।
સગુણાય । સર્વથાઽઽરામાય । નિર્દ્વન્દ્વાય । સત્યમાસ્થિતાય ।
સામકૃતે । દણ્ડવિદે । દણ્ડિને । કોદણ્ડિને નમઃ ॥ ૯૬૦

ૐ ચણ્ડવિક્રમાય નમઃ । સાધુક્ષેમાય । રણાવેશિને ।
રણકર્ત્રે । દયાર્ણવાય । સત્ત્વમૂર્તયે । પરસ્મૈ જ્યોતિષે । જ્યેષ્ઠપુત્રાય ।
નિરામયાય । સ્વકીયાભ્યન્તરાવિષ્ટાય । અવિકારિણે । નભઃસદૃશાય ।
સરલાય । સારસર્વસ્વાય । સતાં સઙ્કલ્પસૌરભાય ।
સુરસઙ્ઘસમુદ્ધર્ત્રે । ચક્રવર્તિને । મહીપતયે । સુજ્ઞાય ।
સ્વભાવવિજ્ઞાનિને નમઃ ॥ ૯૮૦

ૐ તિતિક્ષવે નમઃ । શત્રુતાપનાય । સમાધિસ્થાય ।
શસ્ત્રસજ્જાય । પિત્રાજ્ઞાપાલનપ્રિયાય । સમકર્ણાય । સુવાક્યજ્ઞાય ।
ગન્ધરેખિતભાલકાય । સ્કન્ધસ્થાપિતતૂણીરાય । ધનુર્ધારણધોરણ્યે ।
સર્વસિદ્ધિસમાવેશાય । વીરવેષાય । રિપુક્ષયાય । સઙ્કલ્પસાધકાય ।
અક્લિષ્ટાય । ઘોરાસુરવિમર્દનાય । સમુદ્રપારગાય । જેત્રે ।
જિતક્રોધાય । જનપ્રિયાય નમઃ ॥ ૧૦૦૦

ૐ સંસ્કૃતાય નમઃ । સુષમાય । શ્યામાય । સમુત્ક્રાન્તાય ।
સદાશુચયે । સદ્ધર્મપ્રેરકાય । ધર્માય ।
ધર્મસંરક્ષણોત્સુકાય નમઃ ॥ ૧૦૦૮

ઇતિ શ્રીરામસહસ્રનામાવલિઃ ૨ સમ્પાતા ।

Proofread by PSA Easwaran

*shrIrAmasahasranAmAvaliH 2*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*